ओं सत्गुरुभ्यो नमः

## बृहस्पति (व्याळ) स्तोत्रं

बृहस्पतिः सुराचार्यो दयावान् शुभलक्षणः
लोकत्रयगुरुः श्रीमान् सर्व्वज्ञ सर्व्वकोविदः (1)

सर्व्वेशः सर्व्वदाभीष्टः सर्व्वजित् सर्व्वपूजितः
अक्रोधनो मुनिश्रेष्ठो नीतिकर्त्ता गुरुः पिता (2)

विश्वात्मा विश्वकर्त्ता च विश्वयोनिरयोनिजः
भूर्भुव सुवरों चैव भर्त्ता चैव महाबलः (3)

पञ्चविंशति नामानि पुण्यानि नियतात्मना
वसता नन्दभवने विष्णुना कीर्त्तितानि वै (4)

यः पठेत् प्रातरुत्थाय प्रयतः सुसमाहितः
विपरीतो ऽपि भगवान् प्रीतो भवति वै गुरुः (5)

यः श्रृणोति गुरुस्तोत्रं चिरञ्जीवेन् न संशयः
बृहस्पति कृतापीडा न कदाचित् भविष्यति

*बृहस्पतिस्तोत्रं सम्पूर्णं.*